# एकादशः पाठः मानवताधर्मः । (सरलार्थलेखनार्थम्)

कलियुगेऽस्मिन् सर्वत्र विविधधर्माणां प्रचारः भवति इति दृश्यते। किन्तु, 'धर्मः' इति सङ्कल्पनायाः कः अर्थः इति चेत् यः धारयति सः धर्मः। स्वकर्तव्यस्य पालनं नाम धर्मः । यथा – राजधर्मः, पितृधर्मः, कन्याधर्मः, पतिधर्मः, पत्नीधर्मः इत्यादयः ।

यदि मानवः सर्वत्र शान्तिम् इच्छति, विवादं युद्धं च त्यक्तुम् इच्छति तर्हि तेन मानवताधर्म एव पालनीयः । सर्वे धर्माः मानवताहितवादिनः एव । अतः मानवता सर्वधर्माणां मूलम् । स मानवताधर्म एव अत्र वर्णितः अस्ति **म. म. डॉ. देवीप्रसाद खरवण्डीकरमहाभागैः** ।




यथैव सकला नद्यः प्रविशन्ति महोदधिम्।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।१।।

षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।२।।

एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम् ।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम् ।।३।।

सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा ।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा ।।४।।

यथा प्रकाशयत्येको भानुर्भुवनमण्डलम् ।
धर्मान् प्रकाशयत्येकस्तथा मानवतागुणः ।।५।।

आत्मौपम्यं समाश्रित्य मानवो मानवैः सह ।
यदा व्यवहरेल्लोके तदा मानवता भवेत् ।।६।।

सर्वधर्मान् परित्यज्य भज मानवतां ध्रुवम् ।
एषोऽभ्युदयकृत् पन्थाः तथा श्रेयस्करोऽपि च ।।७।।

## भाषाभ्यासः



### १. पूर्णवाक्येन उत्तरं लिखत।

अ) सकला नद्यः कं प्रविशन्ति ?
आ) सङ्गीते स्वराः कीदृशाः ?
इ) कः सर्वधर्मान् व्याप्नोति ?
ई) भानुः कं प्रकाशयति ?
उ) कां भज इति कविः वदति ?

### २. सन्धिविग्रहं कुरुत ।

अ) भानुर्भुवनमण्डलम् = ______ + भुवनमण्डलम् ।
आ) प्रकाशयत्येकस्तथा = ______ + ______ + तथा ।
इ) व्यवहरेल्लोके = ______ + लोके ।
ई) एषोऽभ्युदयकृत् = एषः + ______ ।

### ३. पाठात् ल्यबन्त-अव्ययानि चित्वा लिखत ।

### ४. माध्यमभाषया उत्तरत ।

अ) मानवताधर्म: अभ्युदयकृत् कथं वर्तते ?

आ) 'मानवताधर्म:' इति काव्यस्य आधारेण मानवताधर्मस्य वर्णनं कुरुत ।

### ५. जालरेखाचित्रं पूरयत ।

सर्वे — ______

श्रेयस्कर: — ______

सकला: — ______

षड्जमूला: — ______

### ६. समानार्थकशब्दमेलनं कुरुत ।

| | |
|---|---|
| (१) सरित् | (अ) वर्ण: |
| (२) रङ्ग: | (आ) भानु: |
| (३) अम्भ: | (इ) नदी |
| (४) दिनकृत् | (ई) पन्था: |
| (५) मार्ग: | (उ) सलिलम् |

### पृथक्करणं कुरुत ।

| नाम | सर्वनाम |
|---|---|
| | |
| | |

(मञ्जूषा– मम, राजा, एतौ, साधव:)

| क्रियापदम् | धातुसाधितविशेषणम् |
|---|---|
| | |
| | |

(मञ्जूषा– त्यजतु, हत:, अब्रूत, पीत:)

| नाम | सर्वनाम |
|---|---|
| | |
| | |

(मञ्जूषा– शाखी, वयम्, पिता, ता:)

| क्रियापदम् | धातुसाधितविशेषणम् |
|---|---|
| | |
| | |

(मञ्जूषा– भेतव्यम्, जानाति, ददाति, मुक्त:)

| नाम | सर्वनाम |
|---|---|
| | |
| | |

(मञ्जूषा– कस्मै, यया, रथै:, तीरे,)

| क्रियापदम् | धातुसाधितविशेषणम् |
|---|---|
| | |
| | |

(मञ्जूषा– क्रुद्ध:, अददात्, प्रजायते, दृश्यम्)

| नाम | सर्वनाम |
|---|---|
| | |
| | |

(मञ्जूषा– मनसा, अस्या:, प्राणान्, अयम्)

| क्रियापदम् | धातुसाधितविशेषणम् |
|---|---|
| | |
| | |

(मञ्जूषा–याचते,श्रवणीयम्,प्रदत्तवान्,शिक्षयति)

| नाम | सर्वनाम |
|---|---|
| | |
| | |

(मञ्जूषा– इमानि, शब्देषु, एतया, बाल्ये)

| क्रियापदम् | धातुसाधितविशेषणम् |
|---|---|
| | |
| | |

(मञ्जूषा– रमणीयम्, श्रयेत्, प्राप्ता, भुङ्क्ते)

**अवधेयम्** –

नाम – समस्तपदं न भवेत् ।

क्रियापदम् – लिट् लकारे न भवेत् । लकारेषु प्र.पु.ए.व. केवलम् ।

धातुसाधितविशेषणम् – त्रिषु लिङ्गेषु प्रथमान्तम् ।

7VU5TL

### १. लकारं लिखत ।

अ) बलवन्तं शीतं न बाधते ।
आ) यम: प्राणान् हरति ।
इ) स: जनेभ्य: धनं याचते ।
ई) हेमघट: शब्दं करोति ।
उ) नद्य: महोदधिं प्रविशन्ति ।
ऊ) सर्वे वर्णा: गच्छन्ति शुक्लताम् ।
ए) तदा लोके मानवता भवेत् ।

### २. योग्यं वाच्यपर्यायं चिनुत ।

अ) यम: प्राणान् हरति । (कर्तृवाच्यम्/कर्मवाच्यम्)
आ) स: घण्टां नादयते । (कर्तृवाच्यम्/कर्मवाच्यम्)
इ) धर्मा: मानवतागुणं शंसन्ति । (कर्तृवाच्यम्/कर्मवाच्यम्)

### ३. विग्रहवाक्याणां समासनामभि: मेलनं कुरुत ।

| समासविग्रह: | समासनाम |
|---|---|
| १. दारपोषणे रता: | कर्मधारय: |
| २. यमराजस्य सहोदर: | उपपद-तत्पुरुष: |
| ३. रामस्य अभिषेक: | कर्मधारय: |
| ४. मानवता एव धर्म: | सप्तमी-तत्पुरुष: |
| ५. सर्वे धर्मा: | षष्ठी-तत्पुरुष: |
| ६. अभ्युदयं करोति इति | षष्ठी-तत्पुरुष: |

### ४. विरुद्धार्थकशब्दान् लिखत ।

बलवान्, पुरत:, निर्धन:, मित्रम्, पण्डित:, श्रेयस्कर: ।

## क्रीडत-नन्दत

**धातुरूपाणि वा धातुसाधितानि निरीक्षध्वम् ।**




**भाष् धातो: योग्यरूपै: रिक्तस्थानानि पूरयत ।**

